# COMMON PRE-BOARD EXAMINATION 2025-26

## Subject: SANSKRIT 119

SET-1

Max Marks- 80 | Time – 3 Hrs

**<u>सामान्य निर्देश:</u>**

- **कृपया सम्यक्तया परीक्षणं कुर्न्तु यत् अस्मिन् प्रश्नपत्रे 9 पृष्ठानि मुद्रितानि सन्ति ।**
- **कृपया सम्यक्तया परीक्षणं कुर्न्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।**
- **अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।**
- **प्रत्येकं खण्डं अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।**
- **उत्तलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कःअवश्यं लेखनीयः ।**
- **प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारं एव लेखनीयः ।**
- **सर्वेषां प्रश्नानां उत्तराणि संस्कृतेन ल्खनीसानि ।**
- **प्रश्नानां उत्तराणि ध्यानेन अवश्यं पठनीयः ।**

प्रश्नपत्रस्वरूपम् -

“ क” खण्डः - अपठितावबोधनम 10 अङ्काः

“ ख” खण्डः - रचनात्मककार्यम् 15 अङ्काः

“ ग” खण्डः - अनुप्रयुक्तव्याकरणम् 25 अङ्काः

“ घ” खण्डः - पठितावबोधनम् 30 अङ्काः

### <u>खण्डः - क(अपठितावबोधनम्)</u> 10

1. **<u>अधोलिखित अपठितगद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत</u>**

षट् कारणानि श्रियं विनाशयन्ति। प्रथमं कारणमस्ति असत्यम्। यः नरः असत्यं वदति, तस्य कोऽपि जनः विश्व
उक्तञ्च-'सत्यं ब्रूयात्, प्रियं ब्रूयात्, न ब्रूयात् सत्यमप्रियम्। निष्ठुरता अस्ति द्वितीयं कारणम्। कदापि केनापि सह निष्ठुर
सदैव जगति सर्वैः सह करुणा, दया नम्रता च करणीयाः। तृतीयं कारणम् अस्ति कृतघ्नता। जीवने अनेके जनाः अस्मा
प्रायः जनाः उपकारिणं विस्मरन्ति, प्रत्युपकारं न कुर्वन्ति। एतादृशः स्वभावः कृतघ्नता इति उच्यते। आलस्यम्
दोषः,'आलस्यं हि मनुष्याणां शरीरस्थः महारिपुः'। अहङ्कारः मनुष्यस्य मतिं नाशयति। अहङ्कारी मनुष्यः सर्वदा आत्
करोति। न कदापि कस्यचित् उपकारं करोति। व्यसनानि अपि श्रियं हरन्ति। ये मद्यपानं कुर्वन्ति तेषाम् आत्मिकब
शारीरिकबलं च नश्यन्ति। अतः बुद्धिमान् एतान् दोषान् सर्वथा त्यजेत्।

I. **एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** 2X1/2=2

(i) कीदृशं सत्यं न ब्रूयात् ? (ii) मनुष्याणां शरीरस्थः महारिपुः कः ?

(iii) अहङ्कारः मनुष्यस्य किं नाशयति ?

II. **पूर्णवाक्येन उत्तरत केवलं प्रश्नद्वयम्)** 2X2=4

(i) अहङ्कारी मनुष्यः किं करोति ? (ii) तृतीयं कारणं किं उच्यते ?

(iii) कानि श्रियं हरन्ति ?

III. **अस्य गद्यांशस्य उचितं शीर्षकं लिखत** 1

IV. **निर्देशानुसारं प्रदत्त -विकल्पेभ्यः उचितम् उत्तरं चिनुत(केवलं प्रश्नत्रयम्)** 3X1=3

(i) **नाशयति** – इति क्रिया पदस्य कर्तृपदं किम् ?
(अ) अहङ्कारः (आ) बलम् (इ) जनाः (ई) मनुष्यः
(ii) **विद्वान्** – इत्यर्थे किंपदं अत्र प्रयुक्तम्?
(अ) आलस्यम् (आ) बुद्धिमान् (इ) मनुष्यः (ई) अहङ्कारः
(iii) **दोषान्** - इत्यस्य विशेषणपदं किम्?

(अ) सर्वथा (आ) नाशयति (इ) असत्यम् (ई) एतान्

(iv) **स्मरन्ति** – पदस्य विलोमपदं किमत्र प्रयुक्तम् ?

(अ) उपकुर्वन्ति (आ) अनुस्मरन्ति (इ) विस्मरन्ति (ई) कुर्वन्ति

**खण्डः – ख(रचनात्मकं कार्यम्)**

2. **मातरं प्रति लिखितं पत्रं मञ्जूषापद सहायतया पूरयित्वा पुनः लिखत।** 10x½=5

(i) ________
शिमलातः,
दिनाङ्कः ________
परमपूज्यमातः !
सादरं प्रणामाः।


अहं कुशलः अत्र तत्रापि कामये। भवत्याःपत्रम् प्राप्य मनसि सन्तोषः (ii)..........। मम भ्राता (iii)............... स्वस्थः इति हर्षस्य विषयः । सः मम अध्ययनस्य (iv)............. च विषये चिन्तितः आसीत्। अहं पञ्चवादने (v)…………… यथानिर्दिष्टं (vi)………….. करोमि (vii)……………… च पठामि। नववादने विद्यालयं (viii)…………. । चतुर्वादने (ix) .................. आगच्छामि। सप्तवादने गृहकार्यं करोमि । पितृमहाभागानां प्रणामाः कथनीयाः।

भवत्याः आज्ञापालकः (x) ....................।
प्रदीपः

**मञ्जूषा**

| |
|---|
| पुत्रः, विद्यालयात्, व्यायामं, स्वास्थ्यस्य, जातः, कावेरीछात्रावासः, इदानीम्, तदनन्तरं, उत्थाय, गच्छामि |

3. **<u>मञ्जूषायाम् प्रदत्त शब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत</u>** **5X1=5**



**मञ्जूषा**

| |
|---|
| बालकः, पादकन्दुकेन, पुस्तकम्, पठति, द्वौ बालकौ, चित्रफलके, क्रीडतः, बालिका, निर्माणं, चित्रम्, यन्त्रेण, पश्यति। |

4. **<u>रिक्तस्थानानि पूरयित्वा अधोलिखित संवादं पुनः लिखत</u>** **10x½=5**

**माता** – राघव! त्वं किं .........?

**राघवः** – अहं मम ..........गृहकार्यं करोमि।

**माता** – पुत्र! गृहकार्यानन्तरम् .......... गत्वा ततः दुग्धं ........... च आनय।

**राघवः** – अहं ........ पुस्तकं क्रेतुम् आपणं गमिष्यामि ....... दुग्धं शाकफलानि च आनेष्यामि।

**माता** – सायंकाले न, त्वं तु ....... गत्वा आनय।

**राघवः** – ........... किमर्थम्

**माता** – अद्य तव ........... आगमिष्यति, अतः भोजनं समयात् पूर्वमेव पक्ष्यामि।

**राघवः** – मातुलः आगमिष्यति चेत् अहम् इदानीम् एव गत्वा वस्तूनि ............ आगच्छामि।

**मञ्जूषा**

(आपणं,तदा,शाकफलानि,मातुलः,पूर्वमेव,शीघ्रम्,क्रीत्वा,करोषि,विद्यालयस्य,आपणम्)

## खण्ड - ग

5. **<u>अधोलिखितेषुसन्धिं सन्धिच्छेदं वा कुरुत</u>** **4x1=4**

(i) अच् + अन्तः (ii) शुष्कवृक्षाष्च (iii) सत् + मतिः (iv) सदाचारस्य+ एव

6. **<u>अधोलिखित रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः उचितशब्दरूपं चित्वा लिखत</u>** **4x1=4**

**(i)** सः **<u>यथेच्छं</u>** फलानि खादति ।

(अ) इच्छां अनतिक्रम्य (आ) इच्छया सहितम् (इ) इच्छस्य अभावः (ई) इच्छेन समम्

**(ii) <u>अविवेकः</u>** परमापदां पदम् ।

(अ) अ विवेकः (आ) नवि वेकः (इ) न विवेकः (ई) अविव कः

**(iii)** **<u>गुरोः उपदेशः</u>** शिष्यस्य कल्याणाय भवति ।
(अ) गुरोपदेशः (आ) गुरपदेशः (इ) गुरुपदेशः (ई) गुरवदेशः
**(iv)** सिद्धार्थः विहाराय **<u>प्रतिदिनं</u>** वनं गच्छति ।
(अ) दिनम् यथा (आ) दिनम् प्रति (इ) दिनं दिनं प्रति (ई) दिनस्य इति

7. **<u>अधोलिखितरेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः चित्वा वाक्तपूर्तिः क्रियताम्</u>** **4x1=4**

**(i)** सत्यभाषणस्य **<u>महत्+त्व</u>** कः न जानाति ।
(अ) महत्व (आ) महताम् (इ) महत्त्वम् (ई) महतम्
**(ii)** लङ्कापतिः रावणः एति **<u>शक्ति+ मतुप्</u>** ।
(अ) शक्तिमत् (आ) शक्तिमान् (इ) शक्तिमती (ई) शक्तिमन्तः
**(iii)** उपवनस्य दृश्यं **<u>रमणीयम्</u>** अस्ति।
(अ)रमणीय + त्व (आ)रमणीय + त्वम् (इ)रमणीय + तल् (ई)रमणीय + अनीयर्
**(iv)** सा समाजस्य **<u>सेविका</u>** अपि अस्ति ।
(अ) सेवक+ तल् (आ) सेवक+टाप् (इ) सेवक+त्व (ई) सेवक+तव्यत्

8. **<u>अधोलिखित संवादे रिक्तस्थानानि वाच्यानुसारं प्रदत्तविकल्पेभ्यः उचित पदं चित्वा पूरयत</u>** **3x1=3**

**नयना** – समेश त्वं किं पठसि ?

**सोमेशः** – अधुना तु **(i)** ---------------------- मणिकापुस्तकं पठ्यते ।

**नयना** - शोभनम् किं त्वं श्लोकान् अपि **(ii)** ---------------- ?

**सोमेशः** – आम् मया **(iii)** --------------- अपि पठ्यन्ते।

**मञ्जूषा**

(पठसि,श्लोकाः,मया)

9. **<u>अधोलिखित-दिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूरयत</u>** **4x1=4**

**(i)** अहं प्रातः काले (5:30) ---------------- वादने उत्तिष्ठामि ।

**(ii)** (6:00) ---------------- वादने नित्यक्रियां सम्पादयामि ।

**(iii)** (7:15) ---------------- वादने यावत् योगाभ्यासं करोमि ।

**(iv)** (7:45) ---------------- वादने अल्पाहारं करोमि ।

**10.** **<u>अधोदत्त वाक्येषु मञ्जूषातः उचित अव्ययानि प्रयुज्य वाक्तपूर्तिः क्रियताम्</u>** **3x1=3**

**(i)** भवान् ---------------भ्रमित्वा समयं व्यर्थं मा कुरुत ।

**(ii)** वृद्धः जनः ------------------ चलति ।

**(iii)** वर्षायां भ्रमणाय गृगात् ---------------- मा गच्छ ।

**(इतस्ततः,बहिः, शनैः)**

**11.** **<u>रेखाङ्कितपदेषु अशुद्धयः सन्ति तेषां शुद्धरूपं विकल्पेभ्यः चित्वा लिखत</u>** **3x1=3**

**(i)** विद्वान् सर्वत्र **<u>पूज्यन्ते</u>** ।

(अ) पूज्येते (आ) पूज्यते (इ) पूज्यामि (ई) पूज्यन्ति

**(ii)** ते धसरथस्य **<u>पुत्राणि</u>** सन्ति ।

(अ) पुत्रः (आ) पुत्री (इ) पुत्राः (ई) पुत्रम्

**(iii)** अहम् अध्ययनशीलः **<u>असि</u>** ।

(अ) अस्मि (आ) अस्ति (इ) स्तः (ई) सन्ति

**<u>खण्डः-घ</u>**

**12.** **<u>अधोलिखित पठित गद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत</u>** ।

नाहं स्वर्गं न मोक्षं वा कामये किन्तु आर्त्तानां परित्राणाय एव मे निश्चयः| अस्य याच्ञा वृथा मा अस्तु इत्युक्त्वा स राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्| सः अपि तत् नेत्रं यथास्थानम् अस्थापयत् | ततो महीपालः द्वितीयं नेत्रमपि शनैः निष्कास्य तस्मै अयच्छत्| अथ विस्मितः शक्रः अचिन्तयत्- "अहो धतिः! अहो सत्त्वम्! अहो सत्त्वहितैषिताः!"

**I.** **<u>एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)</u>** **2x1/2=1**

(i) का वृथा मा अस्तु ? (ii) याचकः नेत्रं कुत्र अस्थापयत् ?

(iii) आर्तानां परित्राणाय कस्य निश्चयः ?

**II.** **<u>एकवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)</u>** **2X1=2**

(i) राजा स्वएकं चक्षुः कथं याचकाय समर्पितवान् ? (ii) विस्मितः शक्रः किं अचिन्तयत् ?

(iii) कस्य याच्ञा वृथा मा अस्तु ?

**III.** **<u>यथानिर्देशानुसारं लिखत (केवलं प्रश्नद्वयम्)</u>** **2x1=2**

**(i) कामये –** इति क्रियापदस्य कर्तृपदं किम् ?

**(ii) इन्द्रः –** इत्यर्थे किं पदं अत्र प्रयुक्तम् ?

**(iii)**" **चक्षुः** " - इति पदस्य विशेषणपदं किम् ?

**13.** **अधोलिखितं पद्यांशं पठित्वा प्रदत्त - प्रशनानाम् उत्तराणि संस्कृतेन लिखत**

**चञ्चलं हि मनः कृष्णः प्रमाथि बलवद्दृढम् ।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥**

**I.** **एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **2x1/2=1**

**(i) किं चञ्चलं अस्ति ? (ii) मनसः निग्रहः कस्य इव सुदुष्करः ?**
**(iii) कस्य निग्रहः वायोरिव सुदुष्करः मन्यते ?**

**II.** **एकवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** **2X1=2**

**(i) अस्मिन् श्लोके कः कं संबोधयति ? (ii) मनः कीदृशं अस्ति ?**
**(iii) मनः कथं प्रमाथि ?**

**III.** **यथानिर्देशानुसारं लिखत (केवलं प्रश्नद्वयम्)** **2x1=2**

**(i) चञ्चलम् –** इत्यस्य विशेष्यपदं किम् **?**
**(ii) चित्तम् –** इत्यर्थे किं पदं अत्र प्रयुक्तम् **?**
**(iii) मन्ये –** इति क्रियापदस्य कर्तृपदं किम् **?**

**14.** **अधोलिखितपठित नाट्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत**

राजहंसः - अये! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का का' शब्दैः वातावरणम् आकुली क्रियते ?

राजहंसी - भर्तः! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम् । मेध्यम् अमेध्यं सर्वमेव भक्षयति । कर्णकटुशब्दैः .....

काकः - (प्रविश्य, सक्रोधम् ) आः! किम् उक्तवती भवती? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः? श्रीवासुदेवस्य वर्णः कीदृशः? मुग्धे! अहं तु अतीव कर्त्तव्यपरायणः। प्र ध्वनिना सुप्तान् प्रबोधयामि कर्मसु विनियोजयामि।

**I.** **एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **2x1/2=1**

(i) कस्य कर्कशधवनिना वातावरणं आकुलीक्रियते ? (ii) श्रीरामस्य वर्णः कीदृशः ?
(iii) कः कर्तव्यपरायणः अस्ति ?

**II.** **एकवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** **2X1=2**

(i) प्रभाते कः कान् प्रबोधयति ? (ii) काकः किं भक्षयसि ?
(iii) सरस्तीरे कौ विहरतः स्म ?

**III.** **यथानिर्देशानुसारं लिखत (केवलं प्रश्नद्वयम्)** **2x1=2**

(i) **उक्तवती –** इति क्रियापदस्य कर्तृपदं किम् अस्ति ?
(ii) **मेध्यं** – इत्यस्य विलोमपदं किमत्र प्रयुक्तम् **?**
(iii) **शब्देन –** इत्यर्थे किं पदं अत्र प्रयुक्तम् **?**

**15. अधोलिखित रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । (केवलं प्रश्नचतुष्टयम्)** **5x1=5**

(i) पाठकस्य **षट्** गुणाः सन्ति । (ii)राजा **याचकेभ्यः** धनं ददाति स्म ।
(iii)कामस्य नाशनाय **इन्द्रियाणि** वशे करणीयाणि । (iv)धैर्यं **आपदां** तरणिः ।
(v) राजा पुत्रवत् **प्रजाः** पालयति स्म ।

**16. मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत -** **4x½=2**

आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।
कालेन पादमादत्ते पादं सब्रह्मचारिभिः ॥

अन्वय: -

i --------- आचार्यात् आदत्ते, पादं ii ----------- स्वमेधया। iii -------- पादमादत्ते पादं iv--------- ।

| सब्रह्मचारिभिः, पादम्, शिष्यः, कालेन |
|---|

**अथवा**

**मञ्जूषाया: साहाय्येन श्लोकस्यभावार्थे रिक्तस्थानानि पूरयित्वा पुन: लिखत।**

असंशयं महाबाहो ! मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय ! वैराग्येण च गृह्यते॥

भावार्थ :-

हे महाबाहो ! अत्र संशय: नास्ति यत् एतत् ( i ) .................. अतीव चञ्चलम् अस्ति। इदं (ii) .................... नियन्त्रितम् भवति परन्तु यदि वयं पुन: पुन: (iii)..................कुर्म: , विरक्ता च भवाम: तदा निश्चयेन एतत् वशीकर्तुं (iv)...............।

| बहुकष्टेन, अभ्यासम्, शक्नुम:, मन: |
|---|

**17. मञ्जूषायाः सहायतया पाठाधारित कथापूर्तिः क्रियताम्** **8x½=4**

एकदा बोधिसत्त्व: बहुजन्मार्जितपुण्यफलै: ..............(i) राजा अभवत्। स: नगरस्य समन्तत: धनधान्यसमृद्धा: .................. (ii) अकारयत्। राज्ञ: दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि ............... (iii) तं देशम् आयान्ति स्म। तस्य दानशीलताम् परीक्षितुं शक्र: ..................... (iv) रूपं धारयित्वा आगच्छत्। राज्ञ: नेत्रदानार्थं निश्चयं ज्ञात्वा मन्त्रिण: ............(v) अभवन्। राजा वैद्योक्तविधिना स्वचक्षु: ..............(vi) समर्पितवान्। देवराज: शक्र: तस्य ..................(vii) प्राशंसत्। शक्रस्य प्रभावेण आत्मन: ................ (viii) च राजा पुन: द्रष्टुं समर्थ: अभवत्।

**मञ्जूषा-**

| त्यागवृत्तिम्, दानशाला:, विषण्णाः, सत्यपुण्यबलेन, जना:, याचकाय, शिवीनां, नेत्रहीनयाचकस्य |
|---|

**18.** <u>अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलं उचितार्थं चित्वा लिखत</u> **4X1=4**

(i) राज्ञ: दानशीलताम् **आकर्ण्य** जना: तं देशम् आयान्ति स्म।

क) श्रुत्वा ख) मत्वा ग) प्राप्य

(ii) अभ्यासेन तु **कौन्तेय** वैराग्येण च गृह्यते ।

क) भीम: ख) अर्जुन: ग) नकुल:

(iii) **सकलं** जगत् ध्वस्तं भविष्यति ।

क) समस्तम् ख) ईश्वरीयम् ग) अर्थम्

(iv) स विवेक इति **ईरित:**।

क) दृष्ट: ख) कथित: ग) श्रुत:

**END OF THE QUESTION PAPER**